तत्पर्य्याय:। क्रेपा २। इत्यमर:। २।७।४७॥ ह्रेपा ३। इति तट्टीका ॥

हेषी, [न्] पुं (हेषा इति शब्दोऽस्त्यस्य। इनि:।) अश्व:। इति त्रिकाण्डशेष: ॥

हैहै, व्य, (है च है च।) सम्बोधनम्। हूति:। इति मेदिनी ॥

है, व्य, (हिनोतीति। हि गतौ बाहुलकात् डै।) सम्बोधनम्। आह्वानम्। इति मेदिनी ॥

हैतुक:, पुं, (हेतुना चरतीति। हेतु+ठक्।) सद्युक्तिव्यवहारी। यथा, मनु:।
"त्रैविद्यो हैतुकस्तर्की निरुक्तो धर्म्मपाठक:।
त्रयश्चाश्रमिण: पूर्व्वे परिषत् स्याद्दशावरा ॥"
त्रैविद्य: त्रिवेदपारग:। हैतुक: सद्युक्तिव्यवहारी। इति व्यवहारतत्त्वम् ॥ हेतुद्वारा सत्कर्म्मसु सन्देहकर्त्ता। यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैड़ालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥"
इति विष्णुपुराणे। ३। १८। ९९ ॥
पाषण्डादीनां लक्षणम्
"भ्रष्ट: स्वधर्म्मात् पाषण्डो विकर्म्मस्थो निषिद्धकृत्।
यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रित:।
प्रच्छन्नानि च पापानि वैड़ालं नाम तद्व्रतम् ॥"
तद्वान् वैड़ालव्रतिक:।
"प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम्।
व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधै: ॥
सन्देहकृत् हेतुभिर्य: सत्कर्म्मसु स हैतुक:।
अर्व्वाग्दृष्टिर्नैकृतिक: स्वार्थसाधनतत्पर:।
शठो मिथ्याविनीतश्च वकव्रत्तिरुदाहृत: ॥"
इति तट्टीका ॥
(फलाभिसन्धानयुक्ते, त्रि ॥)

हैमं, क्ली, (हिमे भवम्। अण्।) प्रातर्हिमोदभवजलम्। इति राजनिघण्ट: ॥ हिमभवे, त्रि ॥ (यथा, रघौ। १६। ७।
"लब्धान्तरा सावरणेऽपि गेहे
योगप्रभावो न च लक्ष्यते ते।
बिभर्षि चाकारमनिर्वृतानां
मृणालिनी हैममिवोपरागम् ॥")
हेमजाते च त्रि ॥ इत्यमर:। २। ८। ९२ ॥ (यथा, रघौ। ६। १५।
"आकुञ्चिताग्राङ्गुलिना ततोऽन्य:
किञ्चित् समावर्ज्जितनेत्रशोभ:।
तिर्य्यग् विसंसर्पिनखप्रभेण
पादेन हैमं विलिलेख पीठम् ॥")

हैम:, पुं, भूनिम्ब:। इति राजनिर्घण्ट: ॥ (हेम्नो विकार:। हेम+अण्।) हेम्नो विकार:। इति मुग्धबोधव्याकरणम् ॥ (शिव:। यथा, महाभारते। १३। १७। ६३।
"हैमो हेमकरो यज्ञ: सर्व्वधारी धरोत्तम: ॥"
पर्व्वतविशेष:। यथा, महाभारते। १३। १९। ५४।
"कैलासं मन्दरं हैमं सर्व्वाननुचचार ह।
तानतीत्य महाशैलान् कैरातं स्थानमुत्तमम् ॥")

हैमनं, क्ली, पुं, (हेमन्त एव इति। "सर्व्वत्राण् च तलोपश्च।" ४। ३। २२। इति स्वार्थे अण् तलोपश्च।) हेमन्त ऋतु:। यथा। हेमन्तहैमनावस्त्री। इति शब्दरत्नावली ॥ (हेम्न इदमित्यण्। न टिलोप:।) स्वर्णजाते हिमजाते च त्रि ॥ (हेमन्तभवे च त्रि। यथा, किरातार्ज्जुनीये। १७। १२।
"उमापतिं पाण्डुसुतप्रणुन्ना:
शिलीमुखानव्यथयाम्बभूवु:।
अभ्युत्थितस्याद्रिपतेर्नितम्बमर्कस्य पादा इव हैमनस्य ॥" ॥)

हैमन:, पुं, (हेमन्त एव अण्। तलोपश्च।) मार्गशीर्षमास:। इति राजनिर्घण्ट: ॥ (हेमन्ते जात: अण् तलोपश्च।) हिमकालोद्भवषष्टिकधान्यम्। अस्य गुणा:।
"हैमनास्तु हिमा हृष्या मधुरा बहुवर्च्चस:।"
इति राजवल्लभ: ॥

हैमन्तं, क्ली, पुं, (हेमन्त+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४।३।१६। इति अण्।) हेमन्त ऋतु:। हेमन्तसम्बन्धिनि, त्रि। इति हेमन्तशब्दात् स्वार्थे ष्णप्रत्ययेन निष्पन्नम् ॥

हैमन्तिकं, क्ली, (हेमन्ते भव:। ठञ्।) शालिधान्यम्। आमन धान इति भाषा। यथा,—
"हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवा: ॥"
इति हविष्यान्नप्रकरणे तिथ्यादितत्त्वम् ॥
हेमन्तकालजाते, त्रि ॥ (यथा आश्वलायनीयश्रौतसूत्रे। ४। १२। १।
"बृहस्पति: पांशुलस्तिष्व: शाक्वरो हैमन्तिक: ॥")

हैममुद्रिक:, त्रि, स्वर्णमुद्रिकाविशिष्ट:। हैमी मुद्रिका यस्य इति बहुव्रीहिसमासनिष्पन्न: ॥ इति मुग्धबोधव्याकरणम् ॥

हैमल:, पुं, क्ली, (हिमल+अण्।) हेमन्त ऋतु:। हिमलशब्दात् ष्णप्रत्ययेन निष्पन्न:। इति क्वाचित् शब्दरत्नावली ॥ हैमन इति साधुपाठ: ॥

हैमवतं, क्ली, (हिमवतोऽदूरभवो देश: हिमवत इदं वा। अण्।) भारतवर्षम्। इति त्रिकाण्डशेष: ॥

हैमवत:, पुं, विषभेद:। इति हेमचन्द्र: ॥ (हिमालयसम्बन्धिनि, तज्जाते च त्रि ॥ देशविशेष:। यथा, महाभारते। २। ५०। २०।
"निषदान् पारसीकांश्च कृष्णान् हैमवतांस्तथा ॥")

हैमवतवर्षं, क्ली, भारतवर्षम्। यथा,—
"एतद्धैमवतं वर्षं भारती यत्र सन्तति:।
हेमकूटं परं यत्र नम्ना किंपुरुषोत्तम: ॥"
इति वाराहे रुद्रगीता ॥

हैमवती, स्त्री, (हिमवतोऽपत्यं स्त्री। अण्। ङीप्।) पार्व्वती। (यथा, देवीभागवते। १२। ८। ५७।
"उमाभिधानां पुरतो देवीं हैमवतीं शिवाम् ॥")
हरीतकी। इत्यमर:। १।१।३८; २। ४। ५८ ॥ स्वर्णक्षीरी। (अस्या: पर्य्यायो यथा,—
"कटुपर्णी हैमवती हेमक्षीरी हिमावती।
हेमाह्वा पीतदुग्धा च तन्मूलञ्चोकमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
श्वेतवचा। इति मेदिनी ॥ (अस्या: पर्य्यायो यथा,
"षड्ग्रन्थगोधा वचा ज्ञेया श्वेता हैमवतीति च।"
इति गारुड़े २०८ अध्याये ॥
हिमवत: प्रभवति प्रकाशते प्रथमं दृश्यते इति। "प्रभवति।" ४। ३। ८३। इत्यण्।) गङ्गा। इति धरणि: ॥ (यथा, महाभारते। ३। १०८। १६।
"एवमुक्त: प्रत्युवाच राजा हैमवतीं तदा।
पितामहा मे वरदे! कपिलेन महानदि!
अन्वेषमाणास्तुरगं नीता वैवस्वतक्षयम् ॥"
हिमवति भवा इति। अण्।) रेणुका। कपिलद्राक्षा। अतसी। इति राजनिर्घण्ट: ॥

हैमा, } स्त्री, (हेम तद्वर्णोऽस्त्यस्या: इति अण्।
हैमी, } वा ङीप्।) पीतयूथिका। इति शब्दरत्नावली ॥ (यूथिकाशब्दे अस्या विषयो ज्ञातव्य: ॥

हैयङ्गवीनं, क्ली, (ह्यो गोदोहस्य विकार: इति। "हैयङ्गवीनं संज्ञायाम्।" ५। २। २३। इति खञ् हियङ्ग्वादेशश्च।) सद्योगोदोहोद्भवं घृतम्। इत्यमर:। २। ९। ५२ ॥ नवनीतम्। इति रत्नमाला राजनिर्घण्टश्च ॥ (यथा, हरिवंशे। भविष्यपर्व्वणि। ५८। १०।
"हैयङ्गवीनं क्षीराणि दधि वा किमजीजनन्।
शोधनं सर्व्वमेवेदं नीरोगं प्रतिपद्यते ॥")
तत्पर्य्याय:। सरजम् २ मन्यजम् ३ कल्पस्फुटम् ४। इति हारावली ॥

हैरिक:, पुं. (हिनोतीति। रक्। हैरं आसुरी माया। तज्जानाति। ठक्।) चौर:। इति धरणि: ॥

हैहय:, पुं, (हय्या अपत्यम्। "स्त्रीभ्यो ढक्।" ४।१।१२०। इति ढक्। पृषोदरादित्वात् साधु:। यद्वा हेशब्देन नामैकदेशग्रहणेन नामग्रहणात् हेषाशब्देन हेषाशब्दं कुर्व्वन् हयति गच्छतीति हेहयोऽश्व: तस्यायं "शिवादिभ्योऽण्।" ४। १। ११२। इत्यण्। यद्वा, हे भक्त हे भक्त इति वदन् हयति गच्छतीति हेहयो विष्णु:। तस्यायं हैहय:।) कार्त्तवीर्य्य:। इति हेमचन्द्र: ॥ देशविशेष:। यथा,—
"पश्चिमे हैहयास्ताद्रिम्लेच्छवासशकादय: ॥"
इति ज्योतिस्तत्त्वे कूर्म्मचक्रम् ॥

हैहय:, पुं, (हैहया: तद्देशवासिन: तेषां राजा अण्।) कार्त्तवीर्य्यराज:। इति शब्दरत्नावली ॥ (यथा, रघौ। ११। ७४।
"बिभ्रतोऽस्त्रमचलेऽप्यकुण्ठितं
द्वौ रिपू मम मतौ समागसौ।
धेनुवत्सहरणाच्च हैहय:
त्वञ्च कीर्त्तिमपहर्त्तुमुद्यत: ॥")